Shri Raghunatha Temple MSS. Library,
JAMMU

No. २९८ / घ

Title दशकुमारचरित[redacted]ा टीका

Author

Extent १८ पत्र Age

Subject आख्यायिका (काव्य)

© Dharmartha Trust J&K. Digitized by eGangotri

१८ पत्राणि

दशकुमारचरितटीका

२५८

© Dharmartha Trust J&K. Digitized by eGangotri

दशकुमारभूषण

५००

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशाय नमः॥ ॐ ॥ स्तुत्वेति · इत्थात्तः प्रकारः · अभवदीयमिति · ममैव भवदीयत्वादिति भावः चन्द्रकः समौ
चन्द्रकमेचकौ अ· शारो नानावर्णः शबले मारुते शारइति वैजयन्ती · अधीरमवगं · धैर्यमनुवर्णधार्ष्ट्ययोरित्यजयः · शी
फरेरभः शीफरः स्फीतरम्ययोरित्यजयः · जरठजालपादो वृद्धहंसः · जालपादः श्वेतगरुच्छक्रांगौ मानसप्रियइति वैजय
न्ती · जरठग्रहणमशुभसूचकम् · कमलमूढः कमलत्वेन भ्रान्तः · उपलभ्य अनुभूय · उपलंभस्त्वनुभवः · मुक्तकंठं स्वलि
ततस्वरम् · स्वरः कंठः प्रकीर्तितः इति रत्नकोषः · येन येन प्रकारेण · तदात्वायतिविभागं · तत्कालोत्तरकालयोः इत्यम् · त
त्कालस्तु तदात्वं स्यादायतिः कालउत्तरः इत्यांशयोर्विभागः स्यादित्यजयः · समयो व्यवस्था · समयाः शपथाचारकालसिद्धा
न्तसंविदः · विप्रविध्यमानं · ताड्यमानं · अश्रुणो नेत्र वगुंठितकपोलं · रोदनाम्बुप्रवाहवेष्टितगण्डस्थलं · तुमुले संकुले · अनिर्य
न्त्रितः · अनिवारितः · अंतर्वंशिकः · अन्तःपुरेत्वधिकृतः स्यादन्तर्वंशिको जन इत्यमरः · अनुभावः प्रभावः · अनुभावः प्रभावेच नि
श्चये भावसूचके इति वैजयन्ती · निग्रहः अभिभवः · कोपात्कोपं विधाय · ल्यब्लोपे पञ्चमी · निशाम्यालोक्य · प्रत्यभिज्ञाविस्मृतता

© Dharmartha Trust J&K. Digitized by eGangotri

नआवर्जितं वशीकृतम्· पापस्वभावः· शीलं स्वभावे सद्वृत्ते· ब्राह्मणाब्रुवः· आत्मानं ब्राह्मणं ब्रूते इति विग्रहः· ब्राह्मणाध
मः ब्रुवो हीनः पदार्थे· जातिमात्रोपजीवे तु कथ्यते ब्राह्मणाब्रुव इति वैजयन्ती· स्थूलावतंसितं· स्थूलवदंर्जांसवंधनं इति
धातुः· कुलपांसनी कुलदूषिका· पांसनः कुलदूषक इति वैजयन्ती· भ्रुकुटिः ललाट शिरोनतिः· ललाटे स्थिता कायां भ्रु
कुटिः सा शिरोनतिरिति वैजयन्ती· अतिभूमिः अधिष्ठानम्· सहिष्णुता सहनशीलता· हंसकथायाः स्मर· अधीगर्थदयेशां
कर्मणि षष्ठी· वासुवाले· अथवा लालस्यादात्मनः सार्थस्य मरः· विदितवार्त्तौ विदितवृत्तान्तौ· वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्त स्यादिति समरः·
स्मार्त्तौ दुःखितौ· आकारः सौन्दर्यम्· जिघांसमानं हन्तुमिच्छमाणम्· चण्डशीलोग्रस्वभावः· चण्डः क्रूरातिकोपयोः· उदन्तो वृत्ता
न्तः· उदन्तजातं उदन्तसमूहम्· जातं यन्नोघजन्मसु· राजराजगिरिः कैलासः· संदिश्य· संदेशं कृत्वा संदेशः प्रहितं वच इति वैज
यन्ती· किशोरो बालः· व्रातः समूहः· समूहव्रातसंचयाः· उद्धरणाय उन्मूलनाय· अपेक्षापेक्ष्यः· अपेक्षितापेक्षः· सामान्यसम्पत्तुल्य
योः· व्यूढप्रजनः· पृथक्करकारः· युजेर्णिजन्तादसुडि· चडः· अपि नूनं रक्तलोलौ· अल्पसंधः· अविश्वासपात्रमिता कलत्रान्ते· आजीगणत्·

© Dharmartha Trust J&K. Digitized by eGangotri

टी·का·
गरानेकारपतिस्म· गृहोर्त्तिश्चिलुडः· हृत कौतुकमंगले· कौतुकं त्वभिलाषेस्यादुत्सवे हर्षनर्मणोरिति मेदिनी· जंघाकरिकः
२ जंघाकरिक जांघिको· प्रभवतः प्रभोः· अत्यये च क्षतो हेतोः किं पौरुषं शत्रुर्वच· इतिवचनादत्ययेऽत्र प्रसयः· अधि· अधिक्षेपे या
वा· गुल्यपोरिति केशवः· चारके· चारकं बंधनालयः· उचितकल्पनोपपन्नः· योग्यालंकारायुक्तः· कल्पना सज्जना समे· क्रीडनं
४ क्रीडासाधनः· सकोशवाहनस्य· सेनातुरङ्गयुक्तस्य· अवग्रहः प्रतिबंधः· प्रतिबंधोवग्रहः स्याद्वार्षिकाख्यभयोरपि· उपोद्घाते· उप
प्रकाशे· रागोनुरागे लाक्षादौ मात्सर्ये लोकयोरपीति वैजयंती· इत्सिभिरधिकारिभिः· इत्सी कृत्साधिकारी स्यादिति वैजयंती· व्यजि
ज्ञपत् निवेदितवती· ज्ञपवितृतशो· स्नानताम· स्नानं पादवन्धनं वर्त्तमाने इदमव्ययम्· वर्त्तमानेथ सांप्रतं· व्यवदायमानचन्द्रिके
दैपशोधने· निर्मलीभवज्ज्योत्स्ने· अपाश्रयः· अपाश्रयः शिरोभाग इति वैजयंती· व्यरूपयत् दृष्टवान्· विलोकनं निरीक्षणं नि
भालनम् निरूपणमित्यजयः· प्रतिबद्धो निवारितः· निग्रहान्ताध्यवसायः· निग्रहविषयेन्तर्गतोध्यवसायः· पाराशुवर्णो लोहं र राम·
जतं· सर्वं च तैजसं लोहमित्यमरः· नखरः क्षुरिका· उदस्तः क्षिप्तः· स्तंबेरमो गजः· रयो वेगः· रयो वेगो जवो रंह इति वैजयंती· विग्रहा २

© Dharmartha Trust J&K. Digitized by eGangotri

नस्यविरोधंकुर्वतः गात्रंपूर्वपदंजंघाप्रदेशो हस्तिनां द्वौपूर्वपश्चाज्जंघादिदेशौ गात्रावरेक्रमात् इत्यमरः निर्वर्ण्य दृष्ट्वा निर्वर्ण
नन्तु निध्यानं दर्शनालोकनेक्षणम् अपि अचिन्तिते वर्त्तमानमव्ययम् अतर्कयति तेत्वयि इति केशवः वलिताभ्यां चलिताभ्यां
वलवलने चक्रं चक्रभ्रमं कुण्डलमिति वैजयंती करणपः लोहस्तंभस्तु करणपः इति वैजयंती कर्पणः कुटिलाग्रस्तु कर्पणः
प्रासः कुन्तः कुन्तः प्रासो मिथः समौ पट्टिशः पट्टिशः स्याद्दिशालाग्रस्तोमरः वेगदंडवानिति वैजयन्ती विचिक्षिपे प्रेरितवा
न् समन्ततः सर्वतः समन्ततस्तु परितः सर्वतो विश्वगित्यपि चलति कायेन सेनासमूहेन निकायो निवहो व्यूहः समूहो वि
सरो व्रज इति वैजयंती अन्तरे अवसरे कुरुविन्दो नीलरागकः कुरुविन्दो मणिविशेषः अतिरिक्तं सुपीतं च कुरुविन्दमुदा
हृतम् कृतहस्ततया शिक्षितहस्ततया शिक्षिते कृतमर्थवदिति भागुरिः प्रत्ययात् ज्ञानात् प्रत्ययो धीनशपथज्ञानवि
श्वासहेतुषु कोशवाहनम् सेनाश्वतुरंगमाश्च कोशोऽस्त्री कुड्मले शास्त्रे अर्थे नीके च मन्दिरे इति भागुरिः अस्मद्वृत्येण
गृत्यः पक्षस्य उच्यते इति हलायुधः रोहिणद्रुमस्य वृक्षस्य न्यग्रोधो रोहिणो वट इति वैजयंती अनुयुक्तः पृष्टः प्रश्नेस्याद

© Dharmartha Trust J&K. Digitized by eGangotri

टी॰ का॰ २ 3

तुषो गड इति हलायुधः॥ इति [illegible]स्कुरः॥ असुरविवरं पातालम्॥ अधोलोकस्तु पातालं देसरं ... रसातलम् इत्यजयः॥ संल
पतः॥ अमो ... भाषतः॥ संलापो भाषणं मिथः॥ उपलप्स्यता॥ बुभुत्सुः बोद्धुमिच्छुः॥ न्यशामयं अपश्यम्॥ उद्विग्नवर्णा॥ उद्विग्नो
भ्रान्तमानसः॥ वर्णः कान्तिः॥ उद्विग्नस्य वर्ण इव वर्णो यस्य सः॥ उपलिप्सुः उपलब्धुमिच्छुः॥ प्रसंगप्रोषितस्य कारणेन गतस्य॥ प्रसं
गः कारणं हेतुरिति वैजयन्ती॥ वतंसस्थानीया शेखरसदृशी॥ रतं पुंस्यवतंसो वा कर्णपूरेऽपि शेखरे॥ वष्टि भागुरिरल्लोपमवा
प्योरुपसर्गयोरिति वचनादकारलोपः॥ वारयुवतिः वारस्त्री गणिका वेश्या॥ सनिर्वेदं सर्वत्रोपेक्षासहितम्॥ द्वेषः सर्वत्र निर्वे
दः॥ शिखण्डः केशपाशः स्यादिति वैजयन्ती॥ सानुक्रोशं सकृपं॥ सर्वजन्तुस्य यथा कृपा स्यात् तथेत्यर्थः॥ कृपा दयानुकम्पा स्यादनुक्रो
शोऽप्यथ॥ श्रीवशीपाय॥ श्वः श्रेयसं स्यात् कल्याणं श्वोवसीयं शिवमशुभमिति हलायुधः॥ अभ्युपपत्तिरनुग्रहः॥ अनुष्ठापनं वि
धापनं॥ प्रभृतियोगे पंचमी वक्तव्या॥ अंगक्रिया॥ अंगक्रियापदं गेषु हरिद्रातैलमर्दनमिवात्यापने॥ दोषा वातपित्तश्लेष्मा
णः॥ अग्निर्जाठरः॥ धातवो रसादयः॥ रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः॥ सप्तैव दश चैके केशा रोम त्वक् [illegible] प्रभृ॥ राम॰ ३

© Dharmartha Trust J&K. Digitized by eGangotri

सहेति हेमचन्द्रः शब्दोआकरणमहेतुस्तर्कः समयः सिद्धान्तः समयः शपथाचारकालसिद्धान्तवाचकः आजीवः आ
जीवोपायः क्रीडाकौशले नर्मभाषणनैपुणे क्रीडालीलाच नर्मच सजीवनिर्जीवासु द्यूतकलासु सजीवः कुक्कुटा
दियोधनम् निर्जीवस्य तु रंगादिः अभ्यन्तरकलाः रतसमये कियमाणां किमपि विज्ञानम् साभ्यन्तरकलापनुस्पर्शयोगस्य
र्शनन्तरे इति वात्स्यायनः प्रसाधितायाः प्रसाधितोऽलंकृतस्त्वमूषितश्च परिष्कृतः इति वैजयंती परिबर्हः परिकरः
परिबर्हः परिच्छदः संगृहीतैः विधेयीकृतैः शास्त्रवादिभिः शास्त्रवादिगुणपालकः शिल्पकैर्विज्ञैः शिल्पेषु प्रसिद्धैः प्रती
ते प्रथितख्यातवित्तविज्ञातविश्रुताः कार्तान्तिकः सामुद्रकः कार्तान्तिको लक्षणज्ञः इति वैजयंती किंचिदूनः पीठमर्दए
कविद्यो विटः स्मृतः संधाननिपुणश्चैव हास्यकारी विदूषकः भिक्षुकी श्रमणी समे नागरिका निपुणाः शोचमर्थेथवं
चनमिति वैजयती परिचितपरित्राणासमर्थं दाक्षिण्यम् साधनं दायनम् एकचारिणीव्रतं पातिव्रत्यम् गम्यो विटः
पाल्लविको भुजंगइति भागुरिः प्रतिहस्ती आसन्नगृहवेश्यापतिः प्रतिहस्तो पालिवेश्यप इति वैजयंती संततस्तोमच्छेदनैः

© Dharmartha Trust J&K. Digitized by eGangotri

टी० का०
४
५

तस्य संलऽस्तरो·उपक्रोशनैः·उपक्रोशस्तु गर्हणम्·सङ्गता·संगतिविषयता·मातुर्माता मातकेति वैजयंती·संख्याऽ
ख्यते·प्रतिख्याति संख्यानं मरणम्·उदमनायत·उन्मना अभवत्·उन्मनीयं वस्त्रद्वयम्·तस्मादुन्मनीयं पक्षो तयोर्वस्त्र
योर्युगम्·नैकविकल्प अनेकप्रकारः·विकल्पः संशये भेदे इति वररुचिः·बलिः पूजोपहारः स्यात्·त्रिवर्गो धर्मार्थकामाः·
त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः·अध्यात्मवादे मोक्षोपाय चिन्तनाभिः·प्रकारान्तरं प्रकारभेदः·निवृत्तिसुखप्रसू
तिहेतुः·आत्मसमाधानमात्रं बुद्धेरैकाग्र्यमात्रं·आत्मा यंता धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च।·नअनापते·पतीयते·गृह
तस्यं द्व बृहस्पतिर्भार्यास्त्वं शङ्गतावासुरिति वैजयंती·अभिसारणम्·अभिगमनं·दाशः कैवर्त्तो दाशधीवरौ·आसुर
विप्रलंभनानि·अकुत्साचरणानि·अकुत्साचरणं यत्तदासुरं विप्रलंभनमिति वैजयंती·आगूहति·परिवारो·परिवारः
परिकरः·तीर्थप्रतिपादनम्·विश्राणनं वितरणमिति वैजयंती·तस्यैव कृते तदर्थं·अर्थे कृते व्यपयं तादर्थ्ये वर्त्तनं देयम्·
प्रासजत्·प्रकर्षेण सक्तोऽभवत्·कर्णीरथः प्रवहणमथयानं सपंत्रकम्·प्राशंसीत्·प्रणाममकरोत्·बंधका आसमसा·

राम
४

© Dharmartha Trust J&K. Digitized by eGangotri

पांसुलीवंधकीस्वैरिणीपंसती पुंश्चलीत्वरी · यादवेस्तर्थः · यावन्नावच्चमसा कल्पोऽवधीमानेव धारणे · समकुचत् · मुकुलिता
नि · कुचनिमीलन · तमनुशाप्यन्ते न सहशापिता · इतीपाणिर्थे इत्यनोः कर्मप्रवचनीयत्व · कर्मप्रवचनीययुक्ते द्वितीया · उदयः अ
स्त स्तु च रमस्माप्रदुदयः पूर्वपर्वतः · दशिर प्रेक्षणे इत्यस्माद्धातोः इरितो वेत्यङ् · प्रत्यये कृते अदर्शदिति रूपं भवति अभ्या
स वर्त्तिनः समीपवर्त्तिनः · अभ्यासासन्नानिकटसन्निकृष्टसनीडवत् · विहारः सौगतानां स्त्रीक्रीडायां चेति · वैजयंती · खंडं द्व
क्षसमूहः · खंडं च पादपानां स्यात्खंडकरितुरंगपदमार्गं चेति हलायुधः · अप्राक्षं पृष्टवान् · अभ्युपेत्य अनुमत्य · प्राहिणुव · आगम
पाव · अपत्रपया · लज्जया · मंदाक्षं ह्रीस्त्रपाव्रीडालज्जासापत्रपान्यतः · मलमल्लकं कौपीनं · आच्छादनं संपिधानम् · कौपी
नं मलमल्लकमिति वैजयंती · वेशः वेश्याजनः · प्रेत्यजन्मान्तरेपि · प्रेत्यामुत्र भवान्तरे · निरयो नरकः · स्यान्नारकस्तु नरको निरयो
दुर्गतिः स्त्रियाम् · पिंडी अशोकः · अशोकः पिंडिका पिंडीति वैजयंती · द्युम्नेन धनेन · हिरण्यं द्रविणं द्युम्नमर्थरैविभवा · अपि
· लुब्धः · वित्तसाग्रासहो लुब्धः · इभ्यः समृद्धः · श्रीमानिभ्य आढ्यः समृद्धश्च · कर्णीसुतः स्तेयशास्त्रकर्त्ता · कर्णीसुतः करकः स्ते

© Dharmartha Trust J&K. Digitized by eGangotri

रि· का· पणास्त्रस्य कारक इति वैजयंती· धूर्त्तो निपुणः· धूर्त्तो निपुणो वंचकोऽ इति वैजयंती· समगस्मि· संगतोस्मि· अक्षभूमिः स्था
५ रस्थापनगृहाणि· तन्मूलानि कूटकर्ममूलानि· सावलेपानि· सगर्वाणि· संरंभविचेष्टितानि· वेगमुत्पादितानि· सभिक
प्रत्ययात्· सभिकज्ञानात्· सभिका द्यूतकारकाः· पक्षैरवज्ञानैपुणम्· सर्वजनानां स्वपक्षीकरणनैपुणम्· उच्चावचानि·
5 अनेकप्रकाराणि· उच्चावचं नैकभेदम्· उपप्रलोभनं· मोहनं तु प्रलोभनं· स्वरूपभेदवर्णानि· परस्परान्यथाभावकथनानि·
यणो स्वेषु स्वहोमतः· अश्लीलप्रायान्· असभ्यप्रायान्· अश्लीलं ग्राम्यमापणमिति वैजयंती· द्यूतांगकर्त्तुरैशारे· कितवः
अस्य धूर्त्तः कितवो द्यूतकारकः· चणकः साधुशो व्ययोः· गाव त्साम्पूर्णम्: दीव्यामि क्रीडिष्यामि· दिवु क्रीडादौ· व्यस्य वजनम्
तिष्ठको भवतु· अर्द्धोरूकं वरस्त्रीणामपाचंडातकमंशुकम्· परिहितः आच्छादितः· कौक्षेयकः असिः· कौक्षेयको मंडला
ग्रः करवालः कृपाणवत्· फणिमुखं सुरंगासाधनम्· काकलीकर्त्तरी· संदंशकः संडशी· पुरुषशीर्षका· पुरुषशीर्षप्रकृ राम·
तिः काष्ठमयशिरः· योगवर्त्तिका उपायांजनम्· वर्त्तीचांजनतूलिके· मानसूत्रं प्रमाणरज्जुः· भ्रमरकरंडकम्· दीपनिर्वाप ५

© Dharmartha Trust J&K. Digitized by eGangotri

णशालप्रभांडम्· पटभाक्षः प्रेक्षणकं इति वैजयंती· नीवीमूलधनम्· नीवी मूलवणिग्धनम्· संपातः स्फुरणम्· संपा
तः स्फुरणमुद्गमः· आलोकप्रकाशं· स्मृतः प्रकाश आलोको द्यूतकश्चसमाश्रय इति हलायुधः· निःसंबाधम्· निःसंमर्दनम्·
संकटं ना तु संबाधः· अर्यवर्यः· वैश्यश्रेष्ठः· अर्यः स्वामिवैश्ययोरिति निपातः· अत्रसाय· एतद्देशमवाय· अव्ययास्तप· वैदेशि
कः· सार्थवाहः· दित्सति· दातुमिच्छति· अभिसरः· सहायः· अनुप्लवस्त्वभिसरः सहायोनुचरः समाः· भांडमूल्यगाम्· भांडमू
ल्याद्यमूल्ययोः· दीपिकाठस्तदीपः स्यादिति वैजयंती· अपितु· तथापीत्यर्थः· वयमिति· द्वयोरपि बहुवचनं अस्मदो द्वयोश्चेति·
दर्वीकरः· सर्पः· दर्वीकरो दीर्घपृष्ठो रदंशकोविलेवायः· निर्वर्णनं· निरीक्षणम्· निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्· उ
पक्रम्य· चिकित्सयित्वा· उपक्रमश्चिकित्सा स्यादिति वैजयंती· श्यावः· विवर्णः· श्यावः स्यात्कपिशो धूम्रधूमलो कृष्णलोहिते·
इति शब्दः प्रकारे· इतिहेतुप्रकरणप्रकाशादिसमाप्तिषु· आशयमभिप्रायम्· अभिप्रायश्छन्दोभिप्रायः आशयः· अनतुमा
न्यऽनुमतिमकारयित्वा· निधनंमरणम्· निधनं कुलनाशयोः· प्रतिपत्तिः कर्तव्यम्· प्रतिपत्तिः कर्तव्येप्रतिभाविज्ञानगौर

© Dharmartha Trust J&K. Digitized by eGangotri

टि·का·
६
6

वेद्यपि·प्रत्यवायः·बाधकम्·बाधकं प्रत्यवायः स्यादित्यजयः इव श्वेत्यर्थः स्वावधारणे साम्ये·चैनिश्चितम्·संभावनेत्यर्थः
·प्रज्ञासत्वयोः·बुद्धिधैर्ययोः·अपसर्पश्चारस्पशाः·निष्पत्यनिर्गत्य·यत्न्लगतोः·मुषितं चोरितं धनम्·ग्रैवेयकं कण्ठरज्जुः
ग्रीवाविभूषणे गजे ग्रैवं ग्रैवेयमित्यपीति वैजयंती·पादिणातः दंतेनतिर्यक्प्रहारी·निर्यग्दंतप्रहारस्तु गजः परिणतो
मतइति हलायुधः·पुरीतत्·अंत्रं पुरीतत्·याह्निकया ग्रहणेन·आपीडः समूहः·आपीडः शेखरे भ्राजइति वैजयंती·प्रगेतना
नि·प्रातःकरणीयानि·उपह्वरे रहसि·रहो निकमुपह्वरे·चर्मभस्त्रा·प्रसेविको च्यते भस्त्रा·उद्वेगात् शोकात्·उद्वेगो शोकसंभ्रमा
विति वैजयंती·तातपुत्र·तातस्तु जनके मके·अनवसाय·अविनाश्य·एषकल्पः·स एषप्रकारः·देवप्रमाणम्·देवो निर्णा
यकः प्रमाणं हेतु मर्यादा शास्त्रेयत्ताप्रमातृषु·वरिवस्यमानता·उपास्यमानता वरिवस्या तु शुश्रूषा परिचर्याप्युपासनं·तरणा
य·त्रणावत्·मन्यकर्मण्यनादरे विभाषा प्राणिष्विति चतुर्थी·अभियुक्तः सन्नद्धः·तत्परश्च वीरगोष्ठ्यनुयन्तु जानपदं षदः·संगी
तम्·नृत्यं वाद्यं च त्रयं गीतमिति भागुरिः·रन्ते आच्छादनं·सत्रमाच्छादने यज्ञे सदादाने वनेपि चेति वैजयंती·भावरसानां·वा ह्यार्थो

राम·
६

© Dharmartha Trust J&K. Digitized by eGangotri

लंवनेयस्तु विकारो मानसो भवेत् · सभावः कथ्यते सद्भिस्तस्योत्कर्षो रसः स्मृतः इति हलायुधः · सापदेशं सव्याजम् · व्याजोपदे
शो लक्ष्यं च · अतिनिष्णातः अतिनिपुणः · निष्णातो निपुणोऽभिज्ञ इति वैजयन्ती · तंत्रं प्राधान्ये · तंत्रं प्रधाने सिद्धान्ते · दारिका कुमारी ·
दारिका कन्येति वैजयन्ती · भाववृत्तिः चित्तवृत्तिः ॥ अस्तनाय स्तन्यं पयं भृशामित्यर्थः · अनाश्रवा · उक्ताकारी आश्रवस्तद्विपरीता
वचने स्थित आश्रवः · शाक्यभिक्षुकीम् · शाक्यसिद्धान्ततपस्विनीम् · शाक्यस्तु बोद्धे बुधम्मतः · उपसंगृह्य वंशीकृत्य · परस्परहृतोः
परार्थमित्यर्थः · षष्ठी हेतुप्रयोगे · आकुश्य निन्दयित्वा · उपक्षिप्य प्रस्ताव्य · प्रस्तावः स्यादुपक्षेपः इति वैजयन्ती · अंगदस्तामंत्रे
णाऽव्ययम् · अपि इत्यनुनये प्रत्याख्यातायां विपरीतकथयित्वा · प्रत्याख्यानं निरसने विपरीते च जल्पिते इत्यजयः · विभावि
ते आविष्कृते · आविष्कारो विभावनम् · सप्रश्रयं सप्रणयं · निर्ग्रथिकाग्रहात् अमात्यसिद्धान्तात् · निर्ग्रन्थोऽर्हः क्षपणकः अप
णोजिन इत्यपीति वैजयन्ती · अश्वान्तकंचुकी · अश्वान्तमुद्धान्तमधिश्रयणी चुल्लिरंतिका · निह्नुत्य गोपयित्वा · निह्नवः स्यादप
ह्नव इति वै · अपदेश्या कथनीया · उपक्षेपः प्रस्तावः · पीतक्षोदं तुरंगदूषदः इति हलायुधः · उचितकर्मसु · अभ्यस्ते प्रचितं स्यादिति

© Dharmartha Trust J&K. Digitized by eGangotri

टी॰का॰ वैजयंती॰ प्रवर्त्तनं अनुष्ठानम्॰ निस्त्रिंशः क्रूरखड्गयोः॰ मत्स्य विग्रहे त्वं मत्पत्नी त्वम्॰ पत्नी परिजनादान मूलमापाः परिग्र
हाः॰ मदेनसा॰ मत्पापेन॰ संप्रोक्षितो॰ अभिभूतो ऽर्त्तिज्ञ आच्छादने॰ इह अस्मिन्नवरे॰ अपेहिजरातिके॰ अपगच्छ दूरे॰ उद्धृ हि
७ तम्॰ सूचितम्॰ सूचनमुद्धघट्टनं बोधिरित्यजयः॰ भवतु श्रूयताम्॰ संवादे वर्त्तमानमिदमव्ययम्॰ भवत्वन्तरसंवादेनिर्दोष
स्मारितोपिचेत्यजयः॰ अनुबंधः॰ अनुवृत्तिः॰ नवदम्पत्योः॰ तां रक्षन्तु॰ दयदानगतिरक्षणेषु॰ अधीगर्थदयेशांकर्मणीतिकर्मणि
षष्ठी॰ आरक्षकास्तु वंदिन इति वैजयंती॰ दृप्ततरः गर्वितरः॰ गर्वितो दृप्त उद्धत इति वैजयन्ती॰ सुभगमानी॰ सुभगमात्मानं म
न्यमानः॰ सर्वैर्निजत्वं सौभाग्यं तद्वान् सुभग उच्यते इति दिवाकरः॰ अचिरानिर्मितः॰ अभिनवावलंबितः॰ ताहृतपयोवनंसमे॰
कारयातिर्नागरिक इति वैजयंती॰ कारणानां यातनानां॰ कारणानुयातना तीव्रवेदना॰ मित्रमुखस्य मित्रव्याजस्य॰ मुखं तु वदने
मुख्योनाम्नेक्ष्वनिवाद्युमान्॰ इति भागुरिः॰ अस्याशापुनरामी क्षेतिवैजयंती॰ साधीपमीदृक् तदा॰ अनुयोगव्यतिकरे॰ प्रश्नप्रकारे॰ १८ म॰
संपर्के च व्यतिकरः प्रकारज्ञातयोरपीत्यजयः॰ विरोपित उपमानस्थिकितस्ततइति गोपालितः॰ उपश्लिष्यसन्निकृष्य॰ समुद्गकः सं ७

© Dharmartha Trust J&K. Digitized by eGangotri

पुटकः· उपक्रांतः वशीकृतः· उपक्रमो वशीकारे समारंभे चिकित्सने· वैज· उपछन्दनं उपसान्त्वनम्· सान्त्वनोपछन्दने च समान्त्रन
य इत्यपीति केशवः· अनुभावप्रसयात्· प्रभावज्ञानात्· प्रत्यायितायाः विश्वासितायाः· संक्रमीकृतस्य उपायीकृतस्य· प्रत्ययो ये
संक्रमेति· श्रेण्यां संक्रमो मतः इत्युत्पलिनी· प्रमत्ता अनवहिता प्रमादोऽनवधानता· प्रत्याख्य प्रत्युतं कृत्वा· प्रसक्तं कुहरः·
आख्यमुरतः· कुहरं सुषिरं देमं भेनागलोके रते पिचे स्तजपः· संकल्पयेत्· चिन्तयेत्· दिग्धम्· विषलिप्तम्· दिग्धलिप्तौ
विषाक्ते चेति वै· जयंती· वासितं धूलम्· सहकारतैलकर्पूरादिभिः सुगंधिकृतम्· घनसारादिभिर्यत्तु वासितं वासमुच्यते
इति वैजयंती· चंगेरिका· चंगेरी वेत्रपुटिका· अपोकानि· अविद्धानि· अपोढमपविद्धं च स्यात् स्त्रक्तमिश्रपीति वैजयंती· प्राति
वेश्यः· प्रतिवेशो चरतियः प्रातिवेश्यः स उच्यते· इति वैजयंती अदिक्षत्· अवोचत्· व्यामः· व्यामो बाह्वोः सकरयोस्ततयोस्ति
र्यगन्तरम्· एकागारिकश्चोरः· चौरैकागारिकस्तेनदस्युतस्करमोषकाः· निरदिक्षत्· निर्दिष्टवान्· उपक्रान्तश्चिकित्सितः· प्र
तिपत्स्य· अभ्युपगम्य· प्राप्तं कर्त्तव्यम्· प्राप्तं पुण्यं च कर्त्तव्य इति वैजयंती· उरगास्येन· फणिमुखेन· निष्पततः· निर्गच्छतः· आसि

© Dharmartha Trust J&K. Digitized by eGangotri

टि·का·
८

धेन्वाङ्गुलिकाया· संस्थानं सन्निवेशः· संस्थानं सन्निवेशं च स्वरूपं च निगद्यत इति वररुचिः· विभागः प्रदेशः· पर्यंकः शयनम· मं
चपर्यंकपल्यंकाः खट्वया समाः· अनुवलितं संवृत्तम् संवृत्तः स्यात्संवलितो मिश्रो मुवलितेपि चेति गोपालितः· वेल्लितं व
क्रितं समेद्दृति वैजयंती· निभिन्नं निक्षिप्तम· दुभिज्प्रक्षेपणे· आमुग्नं ईषत्कुटिलम· भुजो कौटिल्ये· अन्तरीयं अधो वस्त्रम्·
अन्तरीयोपसंव्यानपरिधानान्यधोंशुके· अनतिवलितम्· अनतिप्रवृद्धं निःश्वासारंभः निःश्वासा इति· रुचकः रुचकोंगु
लिकामणिः· अधरकर्णपाशः· अधस्तादपि चाधरः· पर्यावृत्तः समुन्नानद्धमिति वैजयंती· कर्णिका कर्णभूषणे· विषमं अयथा
र्थकम्· संक्रान्तो विंबितः समावितिवैजयंती· पत्रक्रियापत्रजातिः· पुलको बिन्दुरोमांचयोरपि· विश्रब्धविश्वस्तनिर्भयमि
त्यर्थः· विलम्बनं स्फुरणम· उत्संगो मध्यमः· मध्योन्नतो समुत्संगावितिवैजयंती· मृष्यति सहते· वर्तमानसामीप्ये वर्तमा
नवद्वेति लट्· असंकेतितपरामृष्टा· अकृतसंकेते वशरुष्टा· संपर्कक्रियानुसंकेत इत्यजयः· आशीषि लिङ्· उत्तमपुरुषैकव
चनम्· आडोपमहनइत्यात्मनेपदम· नागदन्तोवलंवनम्· तूलिकावर्णवर्त्तिका· करंडः पेटकः· वासतांबूलवीटिकां·ना

राम·
८

© Dharmartha Trust J&K. Digitized by eGangotri

गवल्लीपलाशानां तैलाक्तानां स्नातलः · वेष्टनं वेटिकाप्रोक्ता चन्द्रमंहारवर्णाप्युणिति वा त्सायने · व्यतिहारो विनिमयः सुरुङ्गा तु स्य
लां नंद् · तपस्वी शोच्यः · प्रतिभिय प्रकाश्य · अनामृष्टः अस्पृष्टः · उन्नीतं अनुमितम् · निष्प्रवाणिः · अनाहतं निष्प्रवाणि तन्त्र कंच
नवां वोः · औशीनंशायनाशानइतिहलायुधः · कामचारः द्रुतसंचारः · निघ्नः परवशः · शौंगेयः · तिलङ्घदस्तु शौंगेयो विहंगाराति
रित्यपीति वैजयन्ती · कदर्थिता · निन्दिता क्लेशने चैव वर्णने च कदर्थिता इति सज्जनः · विक्लवो विह्वलः स्यात् · अभिपुष्प · अभियो
गस्त्वभिभवः · आवारूणात् · रुद्ध्वान् · शालः प्राकारः · प्राकारो वरणः शालः · हस्तस्त्रप्रतिसरः · समापत्तिं · समागतः · अभि
सरं सहायीभूतं · संभूय · संगत्य · आथर्वणः पुरोहितः · आथर्वणः पुरोधाः स्याच्छान्तिपुष्टिकरो द्विज इति कामन्दके · अर्प्यमा
णां ह्रीयमानं · यमविषयं यमदेशं · विषयो देश इति पातः · इति द्वितीयोच्छ्वासः · अलिन्दभूमिः प्रघाणप्रघणालिन्दा बहिर्द्वार
प्रकोष्ठके · किमपि · अवशं भ्रंशं वा · जैवातृकस्य आयुष्मान् · वलः संवरश्चेति द्वावसुरौ · जन्यं युद्धं · युद्धमायोजनं जन्यं · लेशतः किं
चित् · सर्वविभक्त्यर्थप्रतीमसत्त्ववत्कयः · प्रयतपाणिः · प्रयत्नेन रक्षितः · स्वस्रीयो भगिनेयः स्यात् · दशावयवम् · सेनैकदेशम् · द

© Dharmartha Trust J&K. Digitized by eGangotri

दि० का० डौ स्त्री शासने शासनं हिंसने दमसेनयोरिति भागुरिः लुब्धकः व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः इत्यमरः नेधऊः दृष्टिपा
लः अविपालः मेषहृत्समपटउकाः पद्धा गोपालः दृष्टिर्यद्युगोपालेचेत्सजयः सार्थघाते संघअंसे अपारयन्ती अशक्नु
९ वन्ती पारस्सामर्थ्ये धातुः हातुस्तकं दायादाः बांधवाः दायादौ सुतबान्धवौ प्रमन्युः प्रकृष्टः शोकः मन्युशोकौ तु शुक् स्त्रिया मूं
१ अभ्युपपादनम् संवर्द्धनम् संवर्द्धनं छेदनं चाभ्युपपत्तिश्चयो वधाम् इत्सजयः व्यापादयितुं हन्तुं व्यापादनं सिहनेचक्षणाने
मारणं तथेति भागुरिः पितरावपियावत् यावन्नावचूसाकल्ये संविदाति जानीतः प्रहारवर्मर्तापधि प्रहारवर्माधीनाः अधिरी
श्वरे यस्मादधिकं यस्य चेश्वरवचनेन त्त्रसप्तमी स्यात् उपधिना कपटेन कपटोऽस्त्री व्याजदंभोपधयश्छद्म कैतवे जालकपटम्
ऽ जालं समूह आनायो गवाक्षे कपटे पि चेति वैजयंती जडीकृतः तुषारः शीतलो जड इति वैजयंती अवसावितं समापितम् जा
लस्य समूहस्य जडो जालमश्च निर्बुद्धौ स्तब्धे नालोचकादित्येति वैज० क्वचित्सम्भ्रे निवेदने इति भागुरिः मत्तकाशिन्यो उत्तमस्त्रि राम०
यो वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी अथ च तथापि अथतु तिष्ठतु इत्यर्थः तिष्ठलिस्यमिषेये स्मिन्नाशामथतु वाम ९

© Dharmartha Trust J&K. Digitized by eGangotri

यमित्यजयः· विप्रलंभः प्रतारणम्· उपकृष्टः· गूढः· समाधिश्चित्तवृत्तिनिरोधः· गाढवर्शीनायदृढज्ञानाय· गाढवाढदृढानि च·
प्रारणोचलम्· स्तलम्पराक्रमः· सत्वोत्साहं तु षु क्लीवेष्यवसायेपराक्रमे· आत्मभावे पिशाचादौ द्रव्ये सत्त्वं स्वभावयो रिति वै
जयंती· उपपन्नंसंस्थानं· अनुगुणावयवः· उपपन्नसमृद्धे च संपन्ने नुगुणोपि चेति केशवः· संस्थानेमरणेगात्रे सन्निवेशे
च वर्त्तत इति भागुरिः· विकल्पनं स्तवः श्लाघेतिहलायुधः· नाटकीयां· नृत्यकारीनाटकी योनृत्यकरइत्यजयः· रमयंति
केतिनामः प्रमदवनः क्रीडावनं· विज्ञेयंप्रमदवनं नृपस्तु यस्मिन् शुद्धान्ते महरमते पुरोपकण्ठे इति हलायुधः आचार्यकं·
आचार्यभावं· गुरुपरिग्रहः· बृहस्पतिपत्नी· अभिसंधिः समुद्योग इति भागुरिः· दुर्विकल्पः· दुर्विचारः· कार्दमिकं· कर्दमेन
रक्तं· कक्षावंधः परिकर इति वैजयंती· उपस्कारः साधनं· साधनं स्यादुपस्कार इति वैजयंती· अभिताना निलक्षणानि उत्तराहि
·दूरीभूते· उदकूप्रदेशे· आदित्तद्दूरइत्सादिशस्यपः· अव्ययम्· रक्ताशोके तुपिण्डीस्या दिति वैजयंती· भांडीरोमल्लिकावघइ
ति अजयः· अवाची दक्षिणा· कुरंटकः· पीतकुरवकः· कुरंठस्तु पीतकः· भृंगारः· भंगारः· कनकालका· महारजनंस्यात

© Dharmartha Trust J&K. Digitized by eGangotri

टि·का· १०

कुसुंभं वह्निशिखं महारजनमित्यपि· मंजुलैर्मनोहरैः· मनोज्ञं मंजु मंजुलम्· संनत्यारथो प्रह्वायः· अवसितार्थाजा
त रतः पातमित्यर्थः· चिकरितं वलितम्· मानसी शारीरी च धारणम्· शारीरधारणायत्तु मौक्तिकनिरीक्षणम्· मानसं
तु मुनीनां स्यादाम्रमेजुविसर्पणम्· आम्रा संवारयेद्रुतो यावन्स्यात्कृतिनिर्हृन्निरितिवास्यापने· विसंवादोन्यथाभावइ
ति वैजयंती· संप्रधार्य· निर्णय· निर्णयः· संप्रधारणम्· शृंगाटकच तुष्पथे· संज्ञपितं विशासितं समालब्धं· मितिवर
रुचिः· नर्मस्मितं· परिहासस्मितम्· द्रवकेलिपरीहासाः क्रीडालीलाच्च नर्म च· पापोक्तं तस्तु वचकः उदरेयत्· उदग
मत्· निशान्तोद्यानम्· निशान्तपक्स्यसनेदेभवनागारमंदिरम्· पाराशर्यं पदे· प्रोक्तं व्यतिषक्तं करवितं· निचाय्य· दृष्ट्वा·
व्यापाद्य· हत्वा प्रह्वाः देशविशेषाः· ग्रामाध्यक्षो गृहपतिः· दंडधरः· सेनापतिः· उद्धारकर्मणि निर्यातकर्मणि· भस्मसात्
भस्मविशेषः· विभाषा सातिकार्त्स्न्ये इति सातिप्रत्ययः· पितृवत्· पितृपि· तत्र तस्येवेति वतिप्रत्ययः· दुर्भिक्षं दुःसमं समे राम· १०
मुषमा परमा शोभा· मुष्टिबंधः· बीजप्रक्षोपपातः· पक्षः सहायः· पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु इति वैजयंती १०

© Dharmartha Trust J&K. Digitized by eGangotri

निशाशायिवितः नाशायितुं विचारितः आभिमानिकं अभिमानं स्वार्थे ठञ् प्रत्यपादयन् प्रदानं प्रतिपादनमिति वैजयन्ती
दद्दुरित्यर्थः प्रसाधितात्मा उपयुक्तबुद्धिः आत्मायत्तो धृतिर्बुद्धिः दुर्भगान् विरमान् पारतल्पिकं परतल्पगमनम् अरी
रधत् असाधयत् राध साध संसिद्धौ इति तृतीयवर्गः एककर्मा समानकर्मा कर्म च भवदन्वेषणामिति उर्मिमालिने
मिं समुद्रावधिकां नेमिस्तु चक्रधारायां सीम धर्मव्यवस्थयोरित्यजयः वराणसीति नद्योद्देपुरा पापहरे शुभे तयोर्मध्यगत
त्वात् सैषा वाराणसी स्मृतेति स्कन्दवचनात् आयसपरिघः अयसा निर्मितो अर्गलः अर्गलः स्यात्तु परिघ इति वैजयन्ती धरि
ब्रू करं कृतवधं उद्धृत्तं दृष्टं दृप्तो भिगतिदृप्तोः कापर्पर्षीणां लं साहसानुवादी साहसस्यसदृशाः सदृकृशदृशासंवादी स
नाज्ञाप्यानुवादिन इति दंडी क्षुब्धमुद्धतम् कोपि साहाय्यकावकाशः तदेव एकच्छेयमित्यन्वयः निर्वर्त्यपदृष्टौ पूर्वेषु कामचारः
पूर्वस्मादिति यथेष्टाचारः दैवछन्दः दैववशः अभिप्रायवशो छन्दो रूपामिगृहीतः चोरितेन सह संगृहीतः दन्ताभ्यां तिर्यक्
प्रत्यहारः परिणमनं दंतयोरूभयोर्मध्ये पतिमानं प्रचक्षते वागंकुशपादैः वाचा अंकुशेन पादेन च अनुक्तः निन्दितः

© Dharmartha Trust J&K. Digitized by eGangotri

टि·का· ११ ॥

कुन्जरापसदः · कुंजराधमः · निहीनोपसदो जाल्मः · कुत्सने कुत्सने [redacted] गति समासः · वारणेन · अंकुशेन · निर्याण
भागे · अपांगदेशे · अपांगदेशो निर्याणं · मलीमसन्तु मलिनं कच्चरं मलदूषितम् · श्रुत [redacted] भिः · अवधृतश्रुभिः · अवधृतवेदः ·
श्रुतं शास्त्रावधृतयोः श्रुषित्तु वेदे मध्यवादौ ज्ञानवृद्धे दिगंबरे इति वैजयंती · श्रुत्र कइति प्रकृतिभावः प्रज्ञा गुरोः प्रधीगुरो
शु · गुणाश्च षट् · शुश्रूषा ग्रहणं चैव श्रवणं चावधारणम् · ऊहापोहार्थविज्ञानं तत्त्व ज्ञानं च धीगुणाः इति कामन्दके हेमातुरः
द्वयोर्मात्रोरपत्यं · आपन्नसत्त्वा गुर्विणी · आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी · आक्रीडागिरिः · उद्यानपर्वतः · प्रमाना
क्रीड उद्यानं राज्ञः साधारणं वनम् · आच्छिद्य · अपहृत्य · उत्तंसितन्ते · शिखरितेन · आप्यानीकृतवस्मा स्थानं कृतानन्तयोगात् · कृ
तानन्तोपमसिद्धान्तदैवाकुशलकर्मस्विति वैजयन्ती · निर्यातनं निवारणम् · निर्यातनं वैरशुद्धौ · गर्भागारं वासगृहं · अलसकेन
श्लेषेण · श्लथत्वलसकोमतइति वैजयन्ती · ज्यायान् श्रेष्ठश्चाग्रेज · अग्रात्यत · अवोध्यात · क्षिणोति पुराक्षयिष्यतिः यावत्पुरानि
पातयोर्लट् · दूषितः भेदितः · दूषवैकृत्ये · णि चि कृते दोषो णाविति उपधायाऊत्वम् · अयथापूर्वं अयथाभावं अयथातथ्येन · पृथा

रम· ११

© Dharmartha Trust J&K. Digitized by eGangotri

तथैवाक्तवंतथ्यमुक्तं· कलुषिताशयाकुलुषितबुद्धिः मज्ञोतंमत्नाम· गोत्रंनाम्निकुलेगोलेइतिवैजयंती· मोक्तुकामस्सन्तु
मिछुः लुंपेदवपमः इत्सेतुंकाममनसोऽपि· समोवाहितततयोर्मेसस्पचिपुरुषत्रोरितिमकारलोपः· उदेश्यत्· उदगम
यत्· अभिजनः वंशः संततिर्गोत्रजननकुलान्यभिजनान्वयौ· कांडपटपतिक्षिप्ते· तिरस्करिणीपरिहृतौ अपटीकांडपटीकं· प्र
तिसीराजवनिकास्यात्तिरस्करिणीचसा· वाद्यकक्षाः कक्ष्याप्रकोष्ठेहर्म्यादिकाच्यांमध्येभवंधने· तूर्णात्त्वरं· सत्वरंचपलंतूर्ण
मविलंवितमाशुच· चिंचाअः ~~स्वविवहारसंमापादुर्विवाकासदर्शकोजनादुपलानःजनाद्रन्नहितःजनेरनुपलक्षितः~~
अम्लिकातिंतिणीचिचेतिवैजयंती· उद्धरध्वनिः उद्धंतुविस्पष्टंवलम्· विष्टतगुत्यः आविष्कृतरहस्यः प्राड्विवाकः व्यवहारनिर्णा
यकः दृष्टिव्यवहाराणांप्राड्विवाकासदर्शको· जनादुपलानः जनादन्तर्हितः जनेरनुपलक्षितः अन्तर्द्धौयेनादर्शनमिच्छतीत्य
पादाने· दर्वीकरोदीर्घपृष्ठोदंदशूकोविलेशयः अम्मादृशीच· अस्मत्समा· त्यदादिषुदृशोनालोचनेकञ्चेतिसूत्रेणात्समानान्व
योश्चेतिवक्तव्यमितिदृशेः कञ्· आसर्वनाम्नइत्यात्वं· दुर्दान्तः दुःखेनदमनीयं· क्वचित्क्वचिद्बहुलार्थेनिष्ठाप्रत्ययइष्यतइतिहरि

© Dharmartha Trust J&K. Digitized by eGangotri

टि॰का॰
१२
12

वचनेन· प्रायः प्रायुक्तं · प्रायो वयसि बाहुल्ये तुल्यानशनमृत्युषु · इति वैजयन्ती बहुलं प्रयुक्तं वा नित्यर्थः · सोदवसितं स्वगृहं · गृ
हं गेहोदवसितं वेश्म सद्म निकेतनम् · विधुर्नानानितरां निरन्तरी · अंगना समाजः · अंगना समूहः · समाजः समूहविशेषः · प
शूनां समजोऽन्येषां समाजोऽथ सधर्मिणां · द्विजातिवृषात् · द्विजातिश्रेष्ठात् · वृषले मूषके श्रेष्ठे सुकृते वृषभे वृषः · सत्यर्थे · कार्यवस्तु
न सतीत्यर्थः · अर्थो विधेयविषये वस्तुप्रयोजननिवृत्तिषु · उदपादीति · चिरात्ते पद इति कर्त्तरि चिरा · उत्कीर्णः समावत्कीर्णो विन्यस्तोऽन्ये
क्षागृहम् · नृत्येक्षणागृहम् · प्रेक्षा नृत्येक्षणं प्रज्ञा · अक्षय्यं · अक्षय्यमित्यर्थः · क्षय्यजय्यौ शक्यार्थे इति निपातनात् · किंकर्ह
णो वितस्तौ च · परिणाहस्तु विष्कम्भ इति वैजयन्ती · स्त्रैणं स्त्रीसमूहः · स्त्रीपुंसाभ्यां नञ्स्नञौ भवनादित्यत्र समूहार्थे नदितवर्द्ध
वर्द्धं निगदितं गदितमिति वैजयन्ती · अस्मदायत्तं अस्मदधीनं · इति चतुर्थवर्गः · अभ्रंकषस्य · अभ्रस्पृशः · अभ्रं व्योम मेघो वा·
घो दिवो द्वे स्त्रियामभ्रं व्योम पुष्करमंबरम् · अभ्रं मेघो वारिवाहः · सर्वकूलाभ्रकरीषेषु कषः इति खच · मुमागमश्च · शशाङ्ख्यातुको राम·
हिंस्रः · आध्मातं पूरितं · एककस्य एकाकिनः · एकाकी त्वेक एककः · हृषिता उदंचिता · हृषेरुदंचने · हृषेर्लोमस्विति इडागमः · स

© Dharmartha Trust J&K. Digitized by eGangotri

मर्यासोपभित्तिं · सोपभित्तेः समीपे · समया निकषा चेति सामीप्ये वर्त्तेते अव्ययम् · अभितः परितः समयेति षष्ठ्यर्थे द्वितीया · मयमनु
रागः · भवं भीत्यनुरागयोः · ऊर्ध्वाण्डकपालम् · आकाशाद् इत्यर्थः · अप एव ससर्जादौ तासु वीर्यमवासृजत् · तदण्डमभवद्धैमं सहस्रां
शुसमप्रभम् · तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः · न खे हिरण्यगर्भः स तदण्डं विभिद् समम · ताभ्यां स शकलाभ्यां च दिवं भू
मिं च निर्ममे · इति मनुवचनात् · शक्तिध्वजशिखरस्थूलोत्सेधं सेनानीः क्रौञ्चघातश्च · कुमारः शक्तिकेतन इत्सजपः · शिखरं म
ण्डपतलमग्रिमं हृस्वशैलयोः शिरस्तु लिनी · शक्तिध्वजो मण्डपतले शैलाग्रे च यस्य · अस्त्रापारोपयेदयं कुमारस्यापयेत्रले ·
नंद्यावर्त्त इति ख्यातः · प्रासादो देवभूभुजाम् · देवयोषा देवस्त्री · स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः · संवाल्यमाना मर्घे
माना · संवाहनं मर्द्दनं स्यात् · छन्नं प्रसवबन्धनम् · शबलितं नानावर्णम् · वर्णकं अङ्गरागः · वर्णकोस्त्री विलेपनम् · किंमप्यव
शाद् देशोस्या दीर्घमात्रेपरात्मनीत्सजपः · जृम्भिका गात्रभङ्गः स्यादित्सजपः · मन्थरेण मसृन्दरौ · लंगत् · चलत् · लंगिकं पन इतिधा
तुः · विभ्रममापारः · व्रीडा मध्येयेषां · आवेगः स्वाद्दरारणाक इति वैजयन्ती · साध्वसायासः · साध्वसमेवायासः · व्यभासीत् · विभा

© Dharmartha Trust J&K. Digitized by eGangotri

टि·का·
१२
13

ताम्रूत·यावत·यावदवधारणे·परिपादाप·प्रदाय·राजराजो धनाधिपः·आत्मालीकं·आत्मापराधम्·अलीकमपराधः स्या
दस्त्स्या प्रियपो रपीतिसज्जनः·लब्धलक्षणाः·लब्धावसरः·निगमः वणिग्ग्रामः·निगमो विषये वेदे पुरे पथि वणिक्पथे·नैगमा
नां वाणिजां ताम्रचूडः·कुक्कुटः·कृकवाकुस्ताम्रचूडः·कुक्कुटश्चरणायुधः·नारिकेलजातिर्वलाकीजातिश्चेत्ति द्वौ कुक्कुटविशेषौ
दीर्घग्रीवः·सितवपुर्महाशरणः·सबलम्बनाः·बलाकाजातिरिति सुकृतस्तदन्यो नारिकेल इति वैजयन्ती·वाटः·श्रेणिः·वाटः पुमान्पथि
मे रापोरितिव रुचिः·उपदस्तिका·पूगायाच पनी चर्मभस्त्रिका चोपदस्तिकेति वैजयन्ती·कण्ठीरवरवः·सिंहनादः·अरण्यानी महा
रण्यमरण्यानी·खर्वटः·ग्रामः·प्रत्यादेशो निरसनम्·प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः·प्राणानीत्यबहुवचनान्तो निर्देशः·पुं
सि भूम्न्यसवः प्राणाः·समापतिर्दृष्टा·समापतिर्यदृच्छासंगतिः·मर्माणि·जीवस्थाने भवेन्मर्म·धन्वन्तरिर्देववैद्यः·शुल्कं जामात्रादेयं राम
वस्तु·शुल्कमस्त्रीजामात्रायस्यदीयते·आपन्नशरणाम्·आपन्नानां रक्षकम्·शरणं गृहरक्षित्रोः·योधीतश्रुतस्तु वेदः स्यात्सोधीत्य १२
च्यते बुधैः·अधीती चतुर्थाम्नाये श्रितिः·कस्मैचित्विषयस्यकर्मणः पुपक्षं स्यानमितिसप्तमी·आस्माधि [redacted] कातुप

© Dharmartha Trust J&K. Digitized by eGangotri

वंधविशेषः प्रसृतानाकुलमपशब्दार्थपदवृत्तिना· पर्यायेन प्रयुक्तो दान्तार्थोसोढासात्म्योपिकामता· वृत्तं ख्याप्यते तस्य नायकेना
यचेष्टितं· वक्रं चापरं वक्रं च काले भाव्यार्थशंसि च· कवेरभिप्रायकृतैरंकनैः केश्चिदानतैः· सोपनिषदोर्थशास्त्रस्य कर्मज्ञानमीमांस
मोः शक्यः· शाक्यः प्रियंवदः प्रोक्त इति हलायुधः· चिरस्मकृन्दनं कृत्वा· संकेतभूमिः सपरिग्रहनप्रदेशः· समये च सपिण्डने च संकेत इ
त्यजपः· संदोहः· समूहः· विलासप्रायं विलासबहुलं· अजितं उन्नतम्· इति पंचमउच्छ्वासः· दामलिप्ताह्वयंस्य दामलिप्तनामधेयस्य· अ
ति मुक्तः पुंड्रकः स्यात्· उत्कंठितश्चिंतया न इति वैजयंती· विंध्यवासिन्याः परमैश्वर्याः सोमापीडां चन्द्रशेखराम्· आपीडः शेखरः समा
विति वैजयंती· अपितु· तथापि· उदरेणत उदगच्छत्· चित्रीयाविष्टचितः चित्रायाविस्मयोद्भुतम्· अयातयामम्· अपरिभुक्तम्· जी
र्णं च परिभुक्तम्· यातयाममिदं द्वयम्· चूर्णपदं· गतागतोऽनुलोम्यतोपन्यासनाधिकक्षेपणां तच्चूर्णपदमिति कनुतंत्रे· गीतमा
र्गं दशपदचंक्रमणानुगीतमार्गः· अनेककरणमधुरम्· अनेकव्यापारस्यं· पंचविंदुप्रसृतम्· पंचावर्त्तप्रहारसुपंचविंदुरू
दाहृतः· गोमूत्रिकाप्रचारेषु· गोमूत्रिकेति विद्वद्भिः स्मारः गातहृदः स्मृतः· घनदर्शितं च· अतिमात्रदर्शितं चेयदर्शितं च· विभ्रमः

© Dharmartha Trust J&K. Digitized by eGangotri

टि·का· स्फुरणाम्· त्रिकं त्रिक टिकायां च पृष्ठवंशाधरेऽपि चेति वैजयन्ती· त्वं किल· असंभावनार्थो किल शब्दः· वार्त्तासंभाव्ययोः किल· वहि
१५ त्रं वहनं· मद्गुः पोतविशेषः· अपि स्विच्चेत्· अपि शब्दः संभावनायां· गर्हा समुच्चय प्रश्न शंका संभावनास्वपि· द्राक्षा· मृद्वीका गोस्त
14 नी द्राक्षा· टंकं तु टंकारः· नपुंसके भावे क्तः· शार्ङ्गं· स्वापतेयं स्वापतेयमिति वैजयन्ती· अनभिचरम्· असहायम्· सांयात्रिकः पोतवणि
क्· शैलेयं गन्धपाषाणः शिलापुष्पं च कथ्यते· नालीकपद्मं· नालीकं पद्मबाणयोरिति वैजयन्ती· वर्षाणि द्वादश· कालाध्वनोर
त्यन्तसंयोग इति द्वितीया· दशाशानाश्व इन्दुः सस्यं धान्यादि· ओषध्यः फलपाकान्ताः· उत्सा प्रस्रवणं वारिप्रवाहः· पर्यहिंडत·
पर्यभ्रमत्· हिडि भ्रमणे· अजाविकं· अजानामवीनां च समूहः· गवलगणं· गवलो महिषो स्त्री तु तस्य शृंगेऽपि वर्त्तते इति वै
जयन्ती गहनो देशे· गहनं काननं वनं इंगुदी तापसतरुः· उत्सेचनं सेकपात्रं पयोदंचनमित्यपि· अष्टादशवर्षदेशीयः किंचि
न्न्यूनाष्टादशवर्षः· ईषदसमाप्तौ कल्पप्देश्यदेशीयरः· शिविषु· कावेरीदक्षिणातीरेषु· शिविर्मरुद्यायात्तु· दक्षिणां तीरमिष्य राम·
त इति वैजयन्ती सहृद्विभक्तः· संमविभक्तः· एकवारे समे सहृदि स्यजयः· कुकुन्दरे· कूपकौ तु नितंबस्थौ द्वयहीने· कुकुन्दरे· १५

© Dharmartha Trust J&K. Digitized by eGangotri

चूचुकं तु कुचाग्रं स्यात्· अथ च तथापीत्यर्थः॥ आकूतं साभिप्रायम्· आकूतमाशयं अभिप्राय इति हलायुधः· कार्ष्णिर्हर्मणीवान्नी
फालस्थः पटिणाकं· मितंपचा· मितनखेति खश· शराबो स्त्री वर्द्धमानक इति वैजयंती· अर्जुनं ककुभे प्रशुः क्लीबे· लोहप
त्रे तु बलये· लोहे तु मुसलाग्रगे· सिकंदीदि विरोदनं इति वैजयंती· कुट्टिमं बद्धभूमिकं निजातकम्· त्वस्य त्रैलंत्रिकटुकम्·
अन चूर्णितेन· विलोडितेन चूर्णविलेपने पेषे इति भागुरिः· कालशेयं दध्याहृतम्· कालशेयमरिष्टमपि गोरसः· काञ्जिकं·
आरनालकसौवीरकुल्माषाभिषुतानि च· अवन्तिसोमधान्याम्लकुंजलानि च कांजिकम्· अधनि· भिक्षा स्त्रीभक्तमन्धो
न्नमोदनो स्त्रीसदीदिविः· कशलितमुज्ज्वलितं त्रिवर्गधर्मकामार्थान्· वृद्धपरिव्राजिकां· वृद्धसंन्यासिनीं· उदर्कः फलमुत्त
रम्· वाणिज्यं व्यवहारः स्यात्· चेटी चिरंटी दासी चेति वैजयंती· दण्डवाहिना· दण्डाधिकारिणा· प्रज्ञादत्ता· कुलपुत्रः शूद्रः·
कुलपुत्रः कुलीने च शूद्रे च· अपरिमुक्ता· अलब्धातिभोगा नारी· असुलभा· प्रौढतानुविद्धा· प्रौढतासम्प्रलक्ष्म चैनं दक्षिणापा
र्श्ववर्ति· अलब्धाभोगपर्याप्तिस्वैरिणां गोत्रयोषिति· दक्षमंधेत्व स्त्र्यर्थत्वविरतं स्वयमिति हृल्लकयायो· भार्गवः ज्योतिषिकः· भा

© Dharmartha Trust J&K. Digitized by eGangotri

द्वि · का · गिवोष्णुकं दैवज्ञो · अतिमंत्रयामास · भेदयामास · घटते ईहते · घटचेष्टायां · व्ययटते संगच्छते · घटयोजने · वृक्षवाटिका गृ
होपवनं दहे पुरि · अपि संभावनायाम् · इति [illegible] वर्गः :: नेत्रनिस्त्रिंशीनेत्रस्पर्शिनी · शिशिरे चुंबने · तारलं उज्वलं · तारलोहा
१५ रले च तारलार्थ उज्वले इति केशवः · रात्रं शावलमात्रियाम् · विनिष्टागारजः · भस्मे स्वर्थः · निष्टा निष्पत्ति नाशांताः · कर्दन
15 इति कलिंगराजस्य नाम · नहनं बन्धनं · आछिद्य अपहृत्य · आछेदनं स्यादाक्षेप इति वररुचिः · निकरं समीपं · निध्याय · आलोक्य ·
कदर्यस्य कृपणस्य · कदर्ये कृपणक्षुद्र किंपचानमितंपचाः · क्लेशानं तु कदर्थनम् · शारणिः पद्धतिः पद्या · चिल्लिका लता भ्रूल
ताम् · चिल्लीभ्रूमध्यमध्वजः · लीलारसम् · लीलासोमम् · अलसं मंदसोमपयो स्मिजप४ स्पदापितेन · स्पदो जव इति निपातः
दयते स्वजनस्य अधिकरणे षष्ठी · वागधीगर्थो कारणेरिति वचनात् · चन्द्रशाला शिरोगृहम् · लीलायितं तिलके शोभा पि
त हस्तविशेषे · तलकोराजकः श्रीमान् · दक्षिणादहनस्सारथिः · मलयपवनः · कलिकाकोरकः पुमान् · कालांडजः वनप्रियः राम०
परभृतः पिकः · कालांडज४स्मृतः रक्तरक्ताधराः · स्निग्धाः स्त्रियः · शालीनो धृष्टः · शालीनकोपीने अधृष्टाकार्ययोरिति निपातः १५

© Dharmartha Trust J&K. Digitized by eGangotri

शृंगारः हेलयक्रियाहेला क्रियाशारदस्य · तत्रं प्रेतत्त्वानकाशे · निकारः अपकारः अपराधोपकारश्चमकारश्च मिथः समा
इति वैजयंती · नराज्ञादस्य राज्ञइत्यर्थः · आयस्पति · पतते · यसुप्रयत्ने इति धातुः · अतिसंहितात् · चिचिंतितात् · स्वहस्तानि · सप
डंगानि · निरुक्तं ज्योतिषं कल्पसूत्रं व्याकरणं तथा · छन्दो विच्छित्तिः शिक्षेति वेदांगानि वदन्ति षट् · धनदानाकरः पक्षः निगम्य · दृ
ष्टा · निगीर्णदृश्यादृष्टि · निगीर्णाखादितं ग्रस्तं भक्षितं मतः · कृतं च जगत् · स संलग्नमेकतः · संसक्तसान्निके · एकतः क्वचित् निकइति
वैजयंती · एकतः सर्वतो योगे शेषार्थे कर्मचेष्यन्त इति द्वितीया · निर्णिक्तं शोधितं मृष्टं लास्यलीलाविलासक्रियायोः · चर्चितं प्रलिप्तं ·
चर्चा चार्चिक्यमालेपइति वैजयंती · रसितशब्दः रसशब्दने · बुद्धिमनीषा धिषणा · जनांते जनपदमध्ये · जनो जनपदः प्रोक्त
इति हलायुधः · शान्तप्रसक्तं · धरणीतैतिलाः · भूमिदेवाः · तैतिलो भूमिकालिंगो · मानित नंदहस्तिप्रमाणम् · पुरुषहस्तिभ्याम
ण् च · नीरं जलं · असचित्रीयत · अतिचित्रमभवत् · निशान्तं निशाशेषम् · अनेयस्य · अविधेयस्य · वश्यः प्रणेयो निभृतविनी
तप्रश्रिताः समाः · नर्मपरीहासः · द्रवकेलिपरीहासाः क्रीडालीला च नर्म च [illegible] · निष्कलः स्थविरः समाविति वैज

© Dharmartha Trust J&K. Digitized by eGangotri

टि॰ का॰ यंती· वंशनालीवेणुदराः· पंचषाः· पंचषड्वाः संख्यायाश्चयेस्यादिना वहुव्रीहिः· वहुव्रीहौ संख्येयेडजवहुगणात् इति समा
१६ सान्तोड्च· व कुलोलिकुचोड्ऊः· जरत्तमहद्दम्· जीर्यते स्म जरत् वदामोवऊपदः· सुर्वदान्यस्थूललक्षदानशौंडा वहुप्रदे·
उत्थानशीलः· पौरुषस्वभावः· उत्थानं पौरुषे तंत्रे संनिविष्टोद्गमेपि च· शाकम्भव्यकल्यारंभी· शाकम्भम्भव्यश्च कल्यः स्वपरआरं
१८ भस्तच्छीलः· शाकं तु सुकरं कर्म भव्यं तु जनलालितम्· कल्यं युक्तं न भंगेन सदैवैष समाचरेत्· नदीष्णो निपुणः· नदीष्णामि
ते निष्णातप्रवीणानि पुणाश्रपि· नदीपूर्वात्स्नाते रातो उपसर्गेक प्रत्ययः· निनदीभ्यांस्नातेः कौशलइतिमूर्द्धन्यः· षाड्
गुण्यपषड्गुणाः· चतुर्वर्णादिपाठात्स्वार्थे ष्यञ् प्रत्ययः· संधिर्नाविग्रहोयानमासनं द्वैधमाश्रयः· षड्गुणाः शक्तयः स्ति
स्रः प्रभावोत्साहमंत्रजाः· चतुर्वर्णएव चातुर्वर्ण्यम्· पुण्यश्लोकः पुण्ययशाः पद्येयशसि च श्लोकः· पापजीविला· तदा
यतिः तत्प्रभावः· स्यात्प्रभावेपि चायतिः· आत्मसंपत् पुरुषगुणाः· क्षेत्रज्ञ आत्मापुरुषः· संपदीयानस्त्रियांस्यात्समृद्धि गुणा राम॰
कोटयपीति हलायुधः· संस्कारोवासनामता· अर्थशास्त्रेषु आन्वीक्षिक्यादिषु· सांध्यम· विपक्षभूतम्· साधनं सहायभूतं· योग १६

© Dharmartha Trust J&K. Digitized by eGangotri

क्षेमयोः · अलब्धलाभो योगः · लब्धस्य परिरक्षणं क्षेमः · अप्राप्तप्रापणं योगः क्षेमः प्राप्तस्य रक्षणम् · द्वयं साधयेद्भूपः प्र
जानां विधिवत्सदः · आराधने साधने स्यादवाप्तौ तोषणेपि चेति · स्थितिर्मर्यादा · अभिषंगः · अभिषंगस्त्वभिभवे संगे आक्रो
शनेपि चेति वैजयंती · शाधि शिक्षय · शास्तु अनुशिष्टौ हुझल्भ्यो हेर्धिः · शाहौ इति शासेः शादेशः · प्रसादचितः · राजप्रसादप्र
सिद्धः · भंगी स्याद्वक्रभाषितमिति वैजयंती · कर्णधारस्तु नाविकः · कुमारः सेवकः कुमारावस्थायाः प्रभृति सेवकः प्रेस्यामु
त्र भवान्तरे · किल अपरमार्थे · पाषण्डः सर्वलिंगी · पटुजातीयः प्रकारवचने जातीयर् · कर्षापणः · कार्षिकः स्यात् · फलं
वा स्वयं · वाग्जालं · समूहार्थे समूहवचो बहुषु इति भपट् · तुलावच्छेद उन्मानो मानः प्रस्थादिभिः कृत इति वैजयंती · मुष्टि
र्मुष्टी परिमाणविशेषो अथवा कुत्स्नाय अयप्रदेशावसिक्तमात्रप्रमाणापुंक्तौ मुष्टिः · कृत्स्नावां तदस्थलविषय आयादि
धि चतुर्विधगणाताप्रको मुष्टिः · पृ एवन्त एवास्य षष्ठी चानादरे · रसप्रणीः · विषदायकः · शृंगाराद्यो विषे वीर्ये गुणे रागे द्रवे र
सः · संविष्टः आरूढशायनः · संवेशः शयने स्यान्ने स्यात्समारोहणेपि चेति अजपः · खलस्तपनं क्षेमप्रापणं · खलत्वात् शीः

© Dharmartha Trust J&K. Digitized by eGangotri

टि॰ का॰ ५४

।।

क्षेमपुरणदे॰ अरिषड्वर्गः॰ कामक्रोधलोभमोहमदमात्सर्याणि॰ मंत्रिवकैः मंत्रिकुत्सितैः कुत्सिता चिकुत्सितैरिति स
मासः॰ अधोदृष्टिर्नैकृतिः॰ स्वार्थसाधनतत्परः॰ शठो मिथ्याविनीतश्च बकवृत्तिचरो द्विज इति मनुः॰ अयातयामं अजीर्णम्॰
तेनाबाधेन॰ तंत्रं स्वराष्ट्रचिन्ता स्यादावापस्त्वरिचिन्तनं॰ पादातपत्तिसंहतिः॰ कोष्ठागाराणि॰ पुंसि कोषोनजाठंकुस्लोन्नर्गहे
तथा॰ यथार्हवीप्सापां यथाशब्दः॰ पंचांगी॰ पंचांगानां समाहारः॰ जानुबाहू हृदयं मूर्द्धा पंचांगमिति कथ्यते इत्युत्पलिनी॰ द्वेष्योक्षि
गतउच्यते इति हलायुधः॰ विलोभनीयवस्तूनि॰ आदरणीयवस्तूनि॰ व्यलीकमपराधः॰ चारणो गायकः समा वित्ति वैजयंती॰
स्यादिसतव्यसनानि॰ स्त्रियोक्षा मृगया पानं वाक्पारुष्यार्थदूषणे॰ दण्डपारुष्यमित्येतन्महाव्यसनसप्तकं इति वैजयंती॰ कष्टः
श्लेष्मा॰ आशया निर्जठराग्निः॰ स्थैर्यं तु कर्मसहजं स्थैर्यं सत्कर्मसंगतावित्ति वैजयंती॰ गवलो महिषः॰ धर्षणीयत्वम्॰ अभिभव
नीयत्वम्॰ उत्कृष्टेषु संक्रन्दनादिनिमित्तेषु॰ एकतानो नन्यवृत्तिः॰ संवर्गणम्॰ संयोजनम्॰ समाहर्त्ता जनाध्यक्षः स्वाम्युक्तो या राम॰
मनायकः इति वैजयंती॰ तत्राध्यक्षाः सेनापतयः॰ सजानयः॰ जायासहिताः॰ जायायानिड् इति समासान्तः॰ धात्रा उपपतिः॰ धा १७

© Dharmartha Trust J&K. Digitized by eGangotri

ताजारे विधातरी स्यज्जपः उपजायामेदाः अद्विद्वेषिणोः द्वेषिणोः स्यान्मध्यपद्धतिरितिवैजयंती· अथ स्याद्मार्गो निर्याणमार्गः·
वंशगुल्मो वेणुगहने· तदं उन्नाने· प्रदहो निम्नभागः· विश्वक्समन्तात्· विसरः समुदायः· संदोह विसरव्रजाः· योगनारी· योतो
विस्तद्द्याघातीस्यात्· योगी मध्ये यन्ने स्थिता· शात्ता स्यं सहस्राक्षिया वनस्पतुरूपा पिताइति वैजयंती· मध्यायनं मार्गमध्य इत्यर्थः·
अयनं वर्त्ममार्गाध्वपंथानः पदवीसृतिः· प्रमापणोः हिंसने· निवर्हणे· हिंसोत्सादनेः· व्यालो दुष्टगजः प्रोक्त इति हलायुधः·
रसाधानं विषाधानं· तीक्ष्णा मर्मणियातका इति वैजयंती· वनवासो वनप्रभुः· अस्मादृशोस्मामिः स्थ घोषआभीरपल्ली स्या
त्· सपत्राकृतः पत्रेणसहविद्धः· वाहनेपुच्छदेपत्रमितिभागुरिः· सपत्रनिष्पत्रादतिव्यथने इति डाच्· क्षोम· तिलकं क्लोमम
स्तिष्कम्· निष्कुलाकृत्य· निष्कुलान्निष्कोषणे इति डाच्· मूलाकृत्य· मूलात्साके इति डाच्· द्रुतिभिद्यतिनीयज्ञमह्वोचापि स्त्रि
यः स्माः संनीयसंमिश्र्य अगदेन औषधेन· संजीवनं स्यादगदमिति वै० कपाली स्यान्महाव्रती· आकार्य· आहूय· दूतिराक
रणाह्वानं गायकास्तु कुशीलवा इति वैजयंती· मात्राः परिच्छदान्· मात्राः परिच्छदे र्थे शोप्रवृत्तो कर्णभूषणे· अस्मदावयवेमा

© Dharmartha Trust J&K. Digitized by eGangotri

टि· का॰
१८
18

नेइति वैजयंती· चंक्रमणं भ्रमणं· उपहितवर्म्मा· तिरस्कृतशरीरः· वर्म्म देहत्राणयोः· कृक्रोशपातः पक्षिविशेषवस्त
तनं· उत्क्रोशः कुररो समौ· अर्द्द कर्त्तुम्· अर्द्दर्मतस्थक्षुश्चेत इत्यादिना सकारलोपः· मठश्चात्र मठो मतः इति हलायुधः· प्र
तिमुक्तं संवद्धं· आमुक्तं च प्रतिमुक्तं चापिनद्धं चापिनद्धवत्· प्रस्तरः शिला· पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत्· म
ठो चर्चिवटः समौ· निर्वेशः भृतिः निर्वेशो भृतिभोगयोः· परस्परानुगृहीताः· अन्योन्यं कृतसहायाः पंचांगमंत्रमूलं· सहायाः
साधनोपायाः विभागो देशकालयोः· विपन्नेश्च प्रतीकारः· सिद्धिः पंचांग इष्यते इति कामन्दकः· द्विरूपप्रभावः· अर्थानां पुरुषाणां
च मृद्धिः· सप्रतापः· प्रभावश्चयत्तेजः कोशदण्डजं· त्रिगुणाः वाङ्· मनः कायिकाः· षड् गुणाः संध्यादयः· अनेकाधिकरणत्वात्
·अनेकप्रकारत्वात्· प्रक्रियात्वधिकारः स्यात्· कोशलाभिजनत्वात्· कोशलवंशत्वात्· संततिर्गोत्रजननकुलान्यभिजना
न्वयौ·॥ १८॥ ॥ इति सप्तम उच्छ्वासः॥ शुभं॥ ५१४

दम॰
१८

© Dharmartha Trust J&K. Digitized by eGangotri